# श्रीरामाष्टकम्
## (श्री व्यासविरचितम्)

भजे विशेषसुन्दरं  समस्तपापखण्डनम्  ।
स्वभक्तचित्तरञ्जनं सदैव राममद्वयम्  ॥ १ ॥

जटाकलापशोभितं  समस्तपापनाशकं ।
स्वभक्तभीतिभञ्जनं भजेह राममद्वयम् ॥ २ ॥

निजस्वरूपबोधकं  कृपाकरं भवापहम् ।
समं शिवं निरञ्जनं भजेह राममद्वयम् ॥ ३ ॥

सहप्रपञ्चकल्पितं  ह्यनामरूपवास्तवम् ।
निराकृतिं निरामयं भजेह राममद्वयम् ॥ ४ ॥

निष्प्रपञ्चनिर्विकल्पनिर्मलं  निरामयम् ।
चिदेकरूपसन्ततं भजेह राममद्वयम् ॥ ५ ॥

भवाब्धिपोतरूपकं ह्यशेषदेहकल्पितम् ।
गुणाकरं कृपाकरं भजेह राममद्वयम् ॥ ६ ॥

महावाक्यबोधकैर्विराजमानवाक्पदैः ।
परं ब्रह्मव्यापकं भजेह राममद्वयम् ॥ ७ ॥

शिवप्रदं सुखप्रदं भवच्छिदं भ्रमापहम् ।
विराजमानदेशिकं भजेह राममद्वयम् ॥ ८ ॥

# Rāmāṣṭakam

The octet on Lord Rāma by Sage Vyāsa

bhaje viśeṣa-sundaraṃ samasta-pāpa-khaṇḍanam
svabhakta-citta-rañjanaṃ sadaiva rāmam-advayam 1

jaṭākalāpa-śobhitaṃ samasta-pāpa-nāśakaṃ
svabhakta-bhīti-bhañjanaṃ bhajeha rāmam-advayam 2

nija-svarūpa-bhodhakaṃ kṛpākaraṃ bhavāpaham
samaṃ śivaṃ nirañjanaṃ bhajeha rāmam-advayam 3

saha-prapañca-kalpitaṃ hyanāmarūpa-vāstavam
nirākṛtiṃ nirāmayaṃ bhajeha rāmam-advayam 4

niṣprapañca-nirvikalpa-nirmalaṃ nirāmayam
cideka-rūpa-santataṃ bhajeha rāmam-advayam 5

bhavābdhipota-rūpakaṃ hyaśeṣa-deha-kalpitam
guṇākaraṃ-kṛpākaraṃ bhajeha rāmam-advayam 6

mahā-vākya-bodhakair-virāja-māna-vākpadaiḥ
paraṃ brahma-vyāpakaṃ bhajeha rāmam-advayam 7

śiva-pradaṃ sukha-pradaṃ bhavacchidaṃ bhramāpaham
virāja-māna-deśikaṃ bhajeha rāmam-advayam 8